## प्रज्ञादिभ्यश्च । (३८/२१०६)

प्रजानाति इति प्रज्ञः । प्रज्ञ इत्येवमादिभ्यः [1]प्रातिपदिकेभ्यः स्वार्थे अण्प्रत्ययो भवति । प्रज्ञ एव प्राज्ञः । प्राज्ञी स्त्री । यस्यास्तु प्रज्ञा [2]विद्यते सा [3]प्राज्ञा 'प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः' (५.२.१०१/१९०८) इति । विदन्नित्यत्र पठ्यते । विदेः शत्रन्तस्य ग्रहणं, 'विदेः शतुर्वसुः' (७.१.३६/३१०५) [4]इत्यत एव ज्ञापकात् पाक्षिको वस्वादेशः । अन्यतरस्यांग्रहणं वा तत्रानुवर्तते, 'तुह्योस्तातङाशिष्यन्यतरस्याम्' (७.१.३५/२१९७) इति ।

प्रज्ञ । [5]वणिज् । उशिज् । उष्णिज् । प्रत्यक्ष । विद्वस् । [6]विदन् । षोडन् । [7]षोडश । विद्या । मनस् । 'श्रोत्र शरीरे' (ग.सू. १५५) – श्रौत्रम् । 'जुह्वत् कृष्णमृगे' (ग.सू. १५६) । चिकीर्षत् । चोर । [8]शत्रु । योध । चक्षुस् । वक्षस् । धूर्त । [9]वस् । एत् । मरुत् । क्रुङ् । राजा । सत्वन्तु । [10]दशार्ह । वयस् । [11]आतुर । रक्षस् । पिशाच । अशनि । कार्षापण । देवता । बन्धु[12] । प्रज्ञादिः ॥

## मृदस्तिकन् । (३९/२१०७)

मृच्छब्दात् स्वार्थे[13] तिकन्प्रत्ययो भवति[14] । विकल्पः सर्वत्रानुवर्तते । मृद् एव मृत्तिका ॥

## सस्नौ प्रशंसायाम् । (४०/२१०८)

[15]प्रशंसोपाधिकेऽर्थे वर्तमानान् मृच्छब्दात् [16]स स्न इत्येतौ प्रत्ययौ भवतः । रूपपः (५.३.६६/२०२१) अपवादः । प्रशस्ता मृद् मृत्सा, मृत्स्ना । नित्यश्चायं [17]प्रत्ययः, उत्तरसूत्रेऽन्यतरस्यांग्रहणात् ॥

## वृकज्येष्ठाभ्यां तिल्तातिलौ च छन्दसि । (४१/३६०४)

प्रशंसायाम् [18]इत्येव । [19]वृकज्येष्ठाभ्यां प्रशंसोपाधिकेऽर्थे वर्तमानाभ्यां [20]यथासङ्ख्यम् तिल्तातिलौ प्रत्ययौ भवतः छन्दसि विषये । रूपपोऽपवादौ[21] । 'वृकतिः' (ऋ. ४.३१.४) । ज्येष्ठतातिः (ऋ. ५.४४.१)[22] ॥

## बह्वल्पार्थाच्छस्कारकादन्यतरस्याम् । (४२/२१०९)

बह्वर्थात् अल्पार्थाच्च कारकाभिधायिनः शब्दात् शस्प्रत्ययो भवति अन्यतरस्याम् । विशेषानभिधानाच्च सर्वं कर्मादिकारकं गृह्यते । बहूनि ददाति बहुशो ददाति । [23]अल्पं ददाति अल्पशो ददाति । बहुभिर्ददाति बहुशो ददाति । अल्पेन, अल्पशः[24] । बहुभ्यः,[25] बहुशः । अल्पाय, अल्पशः इत्येवमाद्युदाहार्यम् । बह्वल्पार्थात्

---

1. प्रातिपदिकेभ्यः नास्ति फ. 2. शेष्यते क. 3. प्राज्ञी भवति ग. 4. इत्यत्र क. 5. वेदिका ग. 6. विदर्थ ह. 7. षोडश, विद्या नास्ति फ.ह. 8. शत्रु क. 9. वसु ह. 10. दशार्ध ह. 11. आसुर ह. 12. बन्धक चण्डाल रोहिण दर्प आकृतिगणोऽयम् इत्यधिकम क. 13. वर्तमानात् इत्यधिकम् क. 14. इति इत्यधिकम् फ. 15. प्रशंसोपाधिकात् स्वार्थे क. 16. स्वार्थे इत्यधिकम् ड.ह. 17. प्रत्ययः नास्ति क. 18. इति वर्तते क. 19. वृकज्येष्ठशब्दाभ्यां क. 20. यथासंख्यम् नास्ति ह. 21. छन्दसि विषये इत्यधिकम् ह. 22. वृकताति । यो नो मरुतो वृकताति मर्त्यैः इत्यधिकम् ग. 23. अल्पान् क. 24. अल्पेभ्यः ददाति इत्यधिकम् क. 25. ददाति इत्यधिकम् क.